# Shri Bhuvaneshvari Trishati Stotram

# श्रीभुवनेश्वरीत्रिशतीस्तोत्रम्

## Document Information

Text title : Bhuvaneshvari Trishati Stotram

File name : bhuvaneshvarItrishatIstotram.itx

Category : devii, devI, trishatI, dashamahAvidyA

Location : doc_devii

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan

Description/comments : See corresponding Namavali

Latest update : June 23, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# श्रीभुवनेश्वरीत्रिशतीस्तोत्रम्

अस्य श्रीभुवनेश्वरी त्रिशतीमालामहामन्त्रस्य सदाशिवऋषिः,
अनुष्टुप्छन्दः, भुवनेश्वरी देवता,
लज्जा बीजम्, कमला शक्तिः वाग्भवं कीलकं
सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥

करन्यासः -
ॐ ह्रां अङ्गुष्ठाभ्यां नमः ।
ह्रीं तर्जनीभ्यां नमः ।
ह्रूं मध्यमाभ्यां नमः ।
ह्रैं अनामिकाभ्यां नमः ।
ह्रौं कनिष्ठिकाभ्यां नमः ।
ह्रः करतल-कर पृष्ठाभ्यां नमः ॥

अङ्गन्यासः -
ॐ ह्रां हृदयाय नमः ।
ह्रीं शिरसे स्वाहा ।
ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हुं ।
ह्रौं नेत्रत्रयाय वौषट् ।
ह्रः अस्त्राय फट् ।
भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानं -
आद्यामशेषजननीमरविन्दयोनेः विष्णोः
    शिवस्य वपुः प्रतिपादयित्रीं सृष्टि स्थिति ।
क्षयकरीं जगतां त्रयाणां ध्याये
    हृदा विमलयान्वहमम्बिके त्वाम् ॥

पञ्चपूजा -
ॐ लं पृथिव्यात्मने गन्धान् धारयामि ।
अं आकाशात्मने पुष्पाणि समर्पयामि ।
यं वाय्वात्मने धूपं आघ्रपयामि ।
रं वह्न्यात्मने दीपं दर्शयामि ।
वं अमृतात्मने अमृतं निवेदयामि ।
सं सर्वात्मने सर्वोपचारान् समर्पयामि ॥

अथ त्रिशतीस्तोत्रम् ।
ॐ ह्रीङ्कार प्रणवाकारा ह्रीङ्कार प्रणवात्मिका ।
ह्रीङ्कार पीठमध्यस्था ह्रीङ्कार प्रणवार्थदा ॥ १॥

ह्रीङ्कार पद्मनिलया ह्रीङ्कारार्णव नाडिका ।
ह्रीङ्कार भालतिलका ह्रीङ्कार मुखलोचना ॥ २॥

ह्रीङ्कार लोचनान्तस्था ह्रीङ्कार गृहदीपिका ।
ह्रीङ्कार वक्ररसना ह्रीङ्कार तरुकोमळा ॥ ३॥

ह्रीङ्कार दन्तिनिलया ह्रीङ्कार शशिशीतला ।
ह्रीङ्कार तुरगारूढा ह्रीङ्कार पुरवासिनी ॥ ४॥

ह्रीङ्कार वनमध्यस्था ह्रीङ्कार वनकेसरी ।
ह्रीङ्कार वनसञ्चारी ह्रीङ्कार वनकुञ्जरी ॥ ५॥

ह्रीङ्कार शैलनिलया ह्रीङ्कार गृहवासिनी ।
ह्रीङ्कार रससारज्ञा ह्रीङ्कार कुचकञ्चुका ॥ ६॥

ह्रीङ्कार नासाभरणा ह्रीङ्काराम्बुजचञ्चला ।
ह्रीङ्कार नासिकाश्वासा ह्रीङ्कार करकङ्कणा ॥ ७॥

ह्रीङ्कार वृक्षकुसुमा ह्रीङ्कार तरुपल्लवा ।
ह्रीङ्कार पुष्पसौरभ्या ह्रीङ्कार मणिभूषणा ॥ ८॥

ह्रीङ्कार मन्त्रफलदा ह्रीङ्कार फलरूपिणी ।
ह्रीङ्कार फलसारज्ञा ह्रीङ्कार गृहमङ्गळा ॥ ९॥

ह्रीङ्कार मेघसलिला ह्रीङ्काराम्बरनिर्मला ।
ह्रीङ्कार मेरुनिलया ह्रीङ्कार जपमालिका ॥ १०॥

ह्रीङ्कार हारपदका ह्रीङ्कारा हारभूषणा ।
ह्रीङ्कार हृदयान्तस्था ह्रीङ्कारार्णवमौक्तिका ॥ ११॥

ह्रीङ्कार यज्ञनिलया ह्रीङ्कार हिमशैलजा ।
ह्रीङ्कार मधुमाधुर्या ह्रीङ्कार भुविसंस्थिता ॥ १२॥

ह्रीङ्कार दर्पणान्तस्था ह्रीङ्कार द्रुमवासिनी ।
ह्रीङ्कार विद्रुमलता ह्रीङ्कार गृहवासिनी ॥ १३॥

ह्रीङ्कार हृदयानन्दा ह्रीङ्कार रससंस्थिता ।
ह्रीङ्कार मुखलावण्या ह्रीङ्कार पदनूपुरा ॥ १४॥

ह्रीङ्कार मञ्चशयना ह्रीङ्कार पदसञ्चरा ।
ह्रीङ्कार नादश्रवणा ह्रीङ्कार शुकभाषिणी ॥ १५॥

ह्रीङ्कार पादुकाऽऽरूढा ह्रीङ्कार मृगलोचना ।
ह्रीङ्कार रथशिखरा ह्रीङ्कार पयसान्निधिः ॥ १६॥

ह्रीङ्कार बिन्दुनादज्ञा ह्रीङ्कार रथपट्टिका ।
ह्रीङ्कार रथसारथ्या ह्रीङ्कार रथनिर्मिता ॥ १७॥

ह्रीङ्कार पादविजया ह्रीङ्कारानलसंस्थिता ।
ह्रीङ्कार जगदाधारा ह्रीङ्कार क्षितरक्षणा ॥ १८॥

ह्रीङ्कार हेमप्रतिमा ह्रीङ्कार करपङ्कजा ।
ह्रीङ्कार ज्ञानविज्ञाना ह्रीङ्कार शुकवाहना ॥ १९॥

ह्रीङ्कार गात्रालङ्कारा ह्रीङ्कार मनुसिद्धिदा ।
ह्रीङ्कार पञ्जरशुकी ह्रीङ्कार परतत्परा ॥ २०॥

ह्रीङ्कार जपसुप्रीता ह्रीङ्कार सदसिस्थिता ।
ह्रीङ्कार कूपसलिला ह्रीङ्कार मृगवाहना ॥ २१॥

ह्रीङ्कार स्वर्गसोपाना ह्रीङ्कार भ्रूसुमध्यका ।
ह्रीङ्कार मुक्ताफलदा ह्रीङ्कारोदकनिर्मला ॥ २२॥

ह्रीङ्कार किङ्किणीनादा ह्रीङ्कार कुसुमार्चिता ।
ह्रीङ्कार कर्णिकासक्ता ह्रीङ्काराङ्कयौवना ॥ २३॥

ह्रीङ्कार मन्दिरान्तस्था ह्रीङ्कार मनुनिश्चला
ह्रीङ्कार पुष्पभ्रमरा ह्रीङ्कार तरुशारिका ॥ २४॥

ह्रीङ्कार कण्ठाभरणा ह्रीङ्कार ज्ञानलोचना ।
ह्रीङ्कार हंसगमना ह्रीङ्कार मणिदीधितिका ॥ २५॥

ह्रीङ्कार कनकाशोभा ह्रीङ्कार कमलार्चिता ।
ह्रीङ्कार हिमशैलस्था ह्रीङ्कार क्षितिपालिनी ॥ २६॥

ह्रीङ्कार तरुमूलस्था ह्रीङ्कार कमलेन्दिरा ।
ह्रीङ्कार मन्त्रसामर्थ्या ह्रीङ्कार गुणनिर्मला ॥ २७॥

ह्रीङ्कार विद्याप्रकटा ह्रीङ्कार ध्यानधारिणी ।
ह्रीङ्कार गीतश्रवणा ह्रीङ्कार गिरिसंस्थिता ॥ २८॥

ह्रीङ्कार विद्यासुभगा ह्रीङ्कार ललनाशुभा ।
ह्रीङ्कार विद्याश्रवणा ह्रीङ्कार विधिबोधना ॥ २९॥

ह्रीङ्कार हस्तिगमना ह्रीङ्कार गजवाहना ।
ह्रीङ्कार विद्यानिपुणा ह्रीङ्कार श्रुतिभाषिणी ॥ ३०॥

ह्रीङ्कार जयविजया ह्रीङ्कार जयकारिणी ।
ह्रीङ्कार जङ्गमारूढा ह्रीङ्कार जयदायिनी ॥ ३१॥

ह्रीङ्कार परतत्वज्ञा ह्रीङ्कार परबोधिनी ।
ह्रीङ्कारेन्द्र जालज्ञा ह्रीङ्कार कुतुकप्रिया ॥ ३२॥

ह्रीङ्कारागम शास्त्रज्ञा ह्रीङ्कार छान्दसस्वरा ।
ह्रीङ्कार परमानन्दा ह्रीङ्कार पटचित्रिका ॥ ३३॥

ह्रीङ्कार कर्णताटङ्का ह्रीङ्कार करुणार्णवा ।
ह्रीङ्कार क्रियासामर्थ्या ह्रीङ्कार क्रियाकारिणी ॥ ३४॥

ह्रीङ्कार तन्त्रचतुरा ह्रीङ्काराध्वरदक्षिणा ।
ह्रीङ्कार मालिकाहारा ह्रीङ्कारसुमुखस्मिता ॥ ३५॥

ह्रीङ्कार देहनिलया ह्रीङ्कार स्तनमण्डिता ।
ह्रीङ्कार बीजस्मरणा ह्रीङ्कार भ्रूविलासिनी ॥ ३६॥

ह्रीङ्कार पुस्तककरा ह्रीङ्कार धनवर्धिनी ।
ह्रीङ्कार क्रियासन्तुष्टा ह्रीङ्कार क्रियासाक्षिणी ॥ ३७॥

ह्रीङ्कार वेदिकान्तस्था ह्रीङ्कार मकुटोज्वला ।

ह्रीङ्कार पवनावेगा ह्रीङ्कार पदरञ्जका ॥ ३८॥

ह्रीङ्कार धान्यविभवा ह्रीङ्कार भववैभवा ।
ह्रीङ्कार वैभवोत्साहा ह्रीङ्कार भवरञ्जका ॥ ३९॥

ह्रीङ्कार योगसन्तुष्टा ह्रीङ्कार योगसंस्थिता ।
ह्रीङ्कार भाग्यनिलया- ह्रीङ्कार भाग्यदायिनी ॥ ४०॥

ह्रीङ्कार रत्नसौवर्णा ह्रीङ्कार स्वर्णशृङ्खला ।
ह्रीङ्कार शङ्खनादज्ञा ह्रीङ्कार शिखिवाहना ॥ ४१॥

ह्रीङ्कार पर्वतारूढा ह्रीङ्कार प्राणसाक्षिणी ।
ह्रीङ्कार पर्वतान्तस्था ह्रीङ्कार पुरमध्यगा ॥ ४२॥

ह्रीङ्कार रविमध्यस्था ह्रीङ्काराम्बरचन्द्रिका ।
ह्रीङ्कार गगनाकारा ह्रीङ्कार व्योमतारका ॥ ४३॥

ह्रीङ्कार विश्वजननी ह्रीङ्कार पुरपालिनी ।
ह्रीङ्कार विश्वनिलया ह्रीङ्कारेक्षुरसप्रिया ॥ ४४॥

ह्रीङ्कार विश्वमध्यस्था ह्रीङ्कार क्षितिमर्षिणी ।
ह्रीङ्कार विश्वसान्निध्या ह्रीङ्कार स्वर्गवासिनी ॥ ४५॥

ह्रीङ्कार विश्वसारज्ञा ह्रीङ्कार लोकनिर्माता ।
ह्रीङ्कार विश्वसामर्थ्या ह्रीङ्कार वटवासिनी ॥ ४६॥

ह्रीङ्कार कुलसन्तुष्टा ह्रीङ्कार कुलनायिका ।
ह्रीङ्कार कुलसान्निध्या ह्रीङ्कार कुलमोहिनी ॥ ४७॥

ह्रीङ्कार कुलतन्त्रज्ञा ह्रीङ्कार कुलरूपिणी ।
ह्रीङ्कार कालिफलदा ह्रीङ्कार कुलसाक्षिणी ॥ ४८॥

ह्रीङ्कारालिकापूर्णा ह्रीङ्कार कुलनिर्मिता ।
ह्रीङ्कार कुलकर्मज्ञा ह्रीङ्कार नटनप्रिया ॥ ४९॥

ह्रीङ्कार मेघनिनादा ह्रीङ्कार कटिमेखला ।
ह्रीङ्कार सच्चिदानन्दा ह्रीङ्कारात्म स्वरूपिणी ॥ ५०॥

ह्रीङ्कार निष्कलाकारा ह्रीङ्कार परमात्मिका ।
ह्रीङ्कार ब्रह्मनिलया ह्रीङ्कार ब्रह्मरूपिणी ॥ ५१॥

ह्रीङ्कार चित्तविमला ह्रीङ्कार श्रीमनोहरा ।
ह्रीङ्कार परमानन्दा ह्रीङ्कार ज्ञानरूपिणी ॥ ५२॥

ह्रीङ्कार वेदपठना ह्रीङ्काराम्बोधिचन्द्रिका ।
ह्रीङ्कार विहगावेगा ह्रीङ्काराचलनिश्चला ॥ ५३॥

ह्रीङ्कार द्वन्द्वनिर्द्वन्द्वा ह्रीङ्कारागमनिर्मला ।
ह्रीङ्कार सङ्गनिस्सङ्गा ह्रीङ्काराचित्स्वरूपिणी ॥ ५४॥

ह्रीङ्कार सुगुणाकारा ह्रीङ्कार सुगुणोत्तमा ।
ह्रीङ्कारागम सन्तुष्टा ह्रीङ्कारागम पूजिता ॥ ५५॥

ह्रीङ्कारागम नैपुण्या ह्रीङ्कारागम साक्षिणी ।
ह्रीङ्कारागम तत्त्वज्ञा ह्रीङ्कारागम वर्द्धिनी ॥ ५६॥

ह्रीङ्कारागम मन्त्रस्था ह्रीङ्कारागम दायिनी ।
ह्रीङ्कार वामनिलया ह्रीङ्कार निधिदायिनी ॥ ५७॥

ह्रीङ्कार वृक्षविहगा ह्रीङ्कार वृषवाहिनी ।
ह्रीङ्कार जीवसायुज्या ह्रीङ्कार शरपञ्जरा ॥ ५८॥

ह्रीङ्कार मुक्तिसाम्राज्या ह्रीङ्कारेन्दु समप्रभा ।
ह्रीङ्कार तारकाहारा ह्रीङ्कार तरुवासिनी ॥ ५९॥

ह्रीङ्कार वेदतत्त्वज्ञा ह्रीङ्काराद्भुत वैभवा ।
ह्रीङ्कारोपनिषद्वाक्या ह्रीङ्कारोपनिषद्श्रुता ॥ ६०॥

ह्रीङ्कारोपनिषद्सारा ह्रीङ्कारोपनिषद्स्तुता ।
ह्रीङ्कार क्षेत्रनिलया ह्रीङ्कार क्षेत्रनिर्मिता ॥ ६१॥

ह्रीङ्कार क्षेत्रालङ्कारा ह्रीङ्कार क्षेत्रपालिनी ।
ह्रीङ्कार स्वर्णबिम्बस्ता ह्रीङ्कार स्वर्णभूषणा ॥ ६२॥

ह्रीङ्कार स्वर्णमकुटा ह्रीङ्कार स्वर्णविग्रहा ।
ह्रीङ्कारान्दोलिकारूढा ह्रीङ्कारान्दोलिकाप्रिया ॥ ६३॥

ह्रीङ्कार शशिबिम्बस्था ह्रीङ्कार शशिभूषणा ।
ह्रीङ्कार बिन्दुसन्तुष्टा ह्रीङ्कारामृतदायिनी ॥ ६४॥

ह्रीङ्कार बिन्दुनिलया ह्रीङ्कारामृतरूपिणी ।
ह्रीङ्कार त्रिगुणाकारा ह्रीङ्कार त्रयलोचना ॥ ६५॥

ह्रीङ्कार त्रयनामस्था ह्रीङ्कार त्रिदिवेश्वरी ।
ह्रीङ्कार मध्यनिलया ह्रीङ्काराक्षर निर्मिता ॥ ६६॥

ह्रीङ्काराक्षर मन्त्रज्ञा ह्रीङ्काराक्षरसाक्षिणी ।
ह्रीङ्काराक्षर संयुक्ता ह्रीङ्काराक्षररूपिणी ॥ ६७॥

ह्रीङ्काराक्षर सारज्ञा ह्रीङ्काराक्षरवर्द्धिनी ।
ह्रीङ्काराक्षर नामान्तस्था ह्रीङ्काराक्षर कारिणी ॥ ६८॥

ह्रीङ्काराक्षर सन्तुष्टा ह्रीङ्काराक्षर मालिका ।
ह्रीङ्कार ज्योतिषप्रज्ञा ह्रीङ्कार ज्योतिरूपिणी ॥ ६९॥

ह्रीङ्कार ऋक्स्वरूपज्ञा ह्रीङ्कार यजुषिप्रिया ।
ह्रीङ्कार सामश्रवणा ह्रीङ्काराथर्वणात्मिका ॥ ७०॥

ह्रीङ्कारोत्पल वेदज्ञा ह्रीङ्कार प्रणवात्मिका ।
ह्रीङ्कार कोशनिलया ह्रीङ्कारादर्शबिम्बिका ॥ ७१॥

ह्रीङ्कार मणिदीप्तार्चिः ह्रीङ्कार मधुरेश्वरी ।
ह्रीङ्कार शब्दश्रवणा ह्रीङ्कारार्थ विचारिणी ॥ ७२॥

ह्रीङ्कार तर्कवादज्ञा ह्रीङ्कार कवचान्विता ।
ह्रीङ्कार योगसारज्ञा ह्रीङ्कार प्राणनायिका ॥ ७३॥

ह्रीङ्कार प्रळयाकारा ह्रीङ्कार परमुक्तिदा ।
ह्रीङ्कार राजमातङ्गी ह्रीङ्कार ललिताम्बिका ॥ ७४॥

ह्रीङ्कार तारकब्रह्म ह्रीङ्कार परसौख्यदा ।
ह्रीङ्कार भुवनाम्बिका ह्रीङ्कार भुवनेश्वरी ॥ ७५॥

इति श्रीभुवनेश्वरित्रिशतिस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Aruna Narayanan

*Shri Bhuvaneshvari Trishati Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*